# Shivaproktam Vaidikashivabhaktalakshananuvarnanam

# શિવપ્રોક્તં વૈદિકશિવભક્તલક્ષણાનુવર્ણનમ્

## Document Information

Text title : Shivaproktam Vaidikashivabhaktalakshananuvarnanam

File name : vaidikashivabhaktalakShaNAnuvarNanam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | ugrAkhyaH saptamAMshaH | adhyAyaH 13 | 526-553||

Latest update : April 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 28, 2024

*sanskritdocuments.org*

# શિવપ્રોક્તં વૈદિકશિવભક્તલક્ષણાનુવર્ણનમ્

- શિવપાર્તવતીસંવાદે -
શ્રી સદાશિવ ઉવાચ -
મદર્ચનં ચ વિવિધં સદ્યઃ સર્વાઘનાશકમ્ ।
નિત્યાગ્નિહોત્રં દર્શશ્ચ ચાતુર્માસ્યં તથૈવ ચ ॥ ૫૨૬॥

મદર્પણધિયા કુર્યુર્જ્યેષ્ઠયજ્ઞં તથૈવ ચ ।
તે વૈદિક ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૨૭॥

વેદાન્તશ્રવણં નિત્યં મનનં ચ વિશેષતઃ ।
કુર્યુસ્તે સદા વિપ્ર સદ્ભક્તા ઇતિ કીર્ત્યતે ॥ ૫૨૮॥

મદર્ચનાધિકારોઽપિ મદ્ભક્તસ્યૈવ વસ્તુતઃ ।
મદ્ભક્તાશ્રિતએવેતિ વિજ્ઞેયં સતતં બુધૈઃ ॥ ૫૨૯॥

યે વેદમાર્ગનિરતાઃ સ્વપ્નેઽપ્યન્યપરાઙ્મુખાઃ ।
વેદૈઃ સર્વૈરહં વેદ્યો વેદાન્તૈરપિ શૈલજે ॥ ૫૩૦॥

મદન્યો વેદવેદાન્તવેદ્યો નાસ્ત્યેવ સર્વદા ।
મમ તત્ત્વમવિજ્ઞાય વેદબાહ્યા ભવન્ત્યતઃ ॥ ૫૩૭॥

ભજન્તિ વેદબાહ્યાસ્તે મદન્યમમરભ્રમાત્ ।
મદન્યપૂજાસંસક્તા લબ્ધ્વા જન્માન્યનેકશઃ ॥ ૫૩૨॥

પ્રાપ્નુવન્ત્યતિઘોરાણિ નરકાણિ પુનઃ પુનઃ ।
વૈદિકાસ્તુ સદાચારા વેદોક્તાચારતત્પરાઃ ॥ ૫૩૩॥

ભજન્તિ માં પ્રયત્નેન વેદાન્યવિમુખાઃ સદા ।
યે માં વિશ્વાધિકં રુદ્રં ભજન્ત્યન્યપરાઙ્મુખાઃ ॥ ૫૩૪॥

તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવં હિ ।
યે ભસ્મોદ્ધૂતસર્વાઙ્ગાસ્ત્રિપુણ્ડ્રાઙ્કિતમસ્તકાઃ ॥ ૫૩૫॥

તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ।
યે રુદાક્ષલસત્કણ્ઠા રુદ્રાક્ષકૃતકઙ્કણાઃ ॥ ૫૩૬॥

તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ।
યે મલ્લિઙ્ગાર્ચનાસક્તા બિલ્વપત્રાદિભિઃ સદા ॥ ૫૩૭॥

તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ।
યે મન્નિરીક્ષણાસક્તાઃ સન્ત્યક્તાન્યેક્ષણાશયાઃ ॥ ૫૩૮॥

તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ।
યે મત્પાદોદપા નિત્યમન્યતીર્થમ્પરાઙ્મુખાઃ ॥ ૫૩૯॥

યે મન્નૈવેદ્યપુષ્ટાઙ્ગા મદ્ઘ્રાતાઽઽઘ્રાણનપ્રિયાઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૦॥

યે મદ્ભક્તાર્ચનસંસક્તા મદ્ભક્તાન્યપરાઙ્મુખાઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૧॥

યે મત્ક્ષેત્રકૃતાવાસાસ્ત્યક્તાન્યક્ષેત્રસંશ્રયાઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૨॥

યે નક્તભોજિનો નિત્યં સર્વદા સોમવાસરે ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૩॥

યે નિત્ય(કૃષ્ણચતુર્દશ્યાં)કૃષ્ણભૂતાયામુપોષણપરાઃ સદા ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૪॥

યે મહેશ મહાદેવ નીલકણ્ઠેતિ વાદિનઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૫॥

યે શૂલપાણે ખટ્વાઙ્ગિન્કૃત્તિવાસેતિ વાદિનઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૬॥

યે દેવોત્તમ દેવેશ વેદવેદ્યેતિ વાદિનઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૭॥

યે વિષ્ણુપૂજ્ય વિશ્વાત્મન્વિધિપૂજ્યેતિ વાદિનઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૮॥

યે મૃત્યુઞ્જયેશ કામારે ત્રિપુરઘ્નેતિ વાદિનઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૪૯॥

યે વિષ્ણુવિધિચન્દ્રેન્દ્રવિદ્યાદાતેતિ વાદિનઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૫૦॥

યે સર્વજ્ઞાઽખિલાધાર હર ધીરેતિ વાદિનઃ ।
તે વૈદિકા ઇતિ પ્રોક્તા મદ્ભક્તાશ્ચ ત એવ હિ ॥ ૫૫૧॥

એતાદૃશા મહાશૈવા રુદ્રૈકપરદૈવતાઃ ।
મદ્ભક્તા ઇતિ વિજ્ઞેયા વેદમાર્ગરતાઃ સદા ॥ ૫૫૨॥

શિવે સુરાણાં મર્ત્યાનાં મદ્ભક્તિર્મદનુગ્રહાત્ ।
ભવત્યનન્યયા ભક્ત્યા મામેવાભ્યુપયન્તિ તે ॥ ૫૫૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે શિવપ્રોક્તં વૈદિકશિવભક્તલક્ષણાનુવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ ઉગ્રાખ્યઃ સપ્તમાંશઃ । અધ્યાયઃ ૧૩ । ૫૨૬-૫૫૩ ॥

- .. shrIshivarahasyam ugrAkhyaH saptamAMshaH . adhyAyaH 13 . 526-553 ..

Notes:
Śiva શિવ details to Gaurī ગૌરી about the significations of His Devotees who are engaged in His Worship is several ways that constitute The Way of The Veda-s, viz. Vaidika-mārga વૈદિકમાર્ગ.

Encoded and proofread by Ruma Dewan

*Shivaproktam Vaidikashivabhaktalakshananuvarnanam*

pdf was typeset on April 28, 2024

Please send corrections to *sanskrit@cheerful.com*